## सङ्कलनात्मकं मूल्याङ्कनम् – I (2014-15)

### संस्कृतम् – सम्प्रेषणात्मकम्

### कक्षा – दशमी

**समय : होरात्रयम्** **पूर्णाङ्काः 90**

**निर्देशाः**

(i) प्रश्नपत्रे **चत्वारः खण्डाः** सन्ति।
खण्डः (क) अपठित–अवबोधनम् – **10 अङ्काः**
खण्डः (ख) रचनात्मक–कार्यम् – **15 अङ्काः**
खण्डः (ग) अनुप्रयुक्त–व्याकरणम् – **30 अङ्काः**
खण्डः (घ) पठित–अवबोधनम् – **35 अङ्काः**
(ii) सर्वे प्रश्नाः **अनिवार्याः।**
(iii) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।
(iv) प्रश्नसंख्या अवश्यमेव लेखनीया।
(v) उत्तराणि संस्कृतेनैव लेखनीयानि।

### खण्ड : 'क'

### अपठित-अवबोधनम् – ( 10 अङ्काः )

1 **अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत।** 10

भारतभूमिः प्रकृतेः सुरम्यं क्रीडाङ्गनम्। क्वचित् अत्र मनोहरैः विकसितैः फलानां पुष्पाणां भारेण नतैः लतापादपैः सुशोभितानि उद्यानानि दर्शकानां चेतांसि हरन्ति, क्वचित् शस्यश्यामला भूमिः मनः चोरयति, भ्रमरकूजितानि सकमलानि सरांसि हृदयम् आनन्दयन्ति। अत्र अयं नगाधिराजः हिमालयः विराजते यतः निस्सृत्य गंगायमुनादयः नद्यः जलेन क्षेत्राणि सिञ्चन्ति।

**(I) एकपदेन उत्तरत।**
(i) भारतभूमिः कस्याः क्रीडाङ्गनम् अस्ति?
(ii) उद्यानानि केषां चेतांसि हरन्ति?

**(II) पूर्णवाक्येन उत्तरत।**
(i) कीदृशानि सरांसि हृदयम् आनन्दयन्ति?
(ii) हिमालयात् काः नद्यः निस्सरन्ति?

**(III) प्रदत्तविकल्पेभ्यः उचितम् उत्तरं निर्देशानुसारं चित्वा लिखत –**


http://jsuniltutorial.weebly.com/

(i) 'उद्यानानि' इति पदस्य विशेषणपदं गद्यांशे किं प्रयुक्तम्?

(अ) भ्रमरकूजितानि (ब) सफमलानि

(स) सुशोभितानि (द) क्षेत्राणि

(ii) 'आनन्दयन्ति' इति क्रियापदस्य कर्तृपदं किम्?

(अ) क्षेत्राणि (ब) चेतांसि (स) सरांसि (द) उद्यानानि

(iii) 'नद्यः' इति कर्तृपदस्य क्रियापदं किम्?

(अ) सिञ्चन्ति (ब) हरन्ति

(स) आनन्दयन्ति (द) चोरयति

(iv) 'अत्र नगधिराजः हिमालयः विराजते' अस्यां पंक्त्यां 'अत्र' पदं कस्मै प्रयुक्तम्?

(अ) प्रकृत्यै (ब) भारतभूम्यै

(स) हिमालयाय (द) उद्यानाय

**(IV) अस्य अनुच्छेदस्य कृते एकम् उपयुक्तं शीर्षकं लिखत।**

**खण्डः 'ख'**

**रचनात्मकं-कार्यम् - ( 15 अङ्काः )**

2 **भवान् सार्थकः भवता पितरं प्रतिं लिखिते पत्रे मञ्जूषापदैः रिक्तस्थानानि पूरयित्वा पत्रं पुनः लिखत।** 5

छात्रावासः

केन्द्रीयः विद्यालयः (i) ।

दिनांङ्क : 28-8-012

आदरणीयाः (ii) !

सादरं चरणवन्दना।

अत्र अहं कुशलेन अस्मि। तत्र अपि सर्वं कुशलं स्यात् इति कामये। पितृवर्याः! अस्मिन् (iii) विद्यालयः (iv) आयोजयति। भारतस्य विभिन्नप्रदेशेभ्यः (v) अस्माकं विद्यालयम् आगच्छन्ति। अस्माकं विद्यालयस्य (vi) अपि तस्यां (vii) भागं गृह्णन्ति। अहं तेषु एकः अस्मि। अतः अहम् अस्मिन् अवकाशे (viii) गृहम् आगमिष्यामि। केषाञ्चित् (ix) अपि आवश्यकता अस्ति। कृपया पञ्चशतानि रूप्यकाणि प्रेषयित्वा अनुग्रहं कुर्वन्तु। मातृचरणयोः प्रणामाः कथनीयाः।

भवतः (x) ,

सार्थकः

**मञ्जूषा**

गोष्मावकाशे, प्रतियोगितायाम्, पितृवर्याः, रूप्यकाणाम्, छात्राः, शिमलातः, क्रीडाप्रतियोगिताम्, आत्मजः, विलम्बेन, क्रीडकाः

JSUNIL TUTORIAL



http://jsuniltutorial.weebly.com/

| | | | |
|---|---|---|---|
| 3 | **मञ्जूषायां प्रदत्तशब्दानां सहायतया चित्रं दृष्ट्वा पञ्च वाक्यानि संस्कृतेन लिखत।**  **मञ्जूषा** क्रीडन्ति, भवन्ति, स्तः, हरीतिमा, वर्षाकालः, कर्गदनौका, मण्डूकाः, छत्रे, मेघाः, सर्वत्र, हस्ते, रचयित्वा, आकाशे | 10 |
| | **अथवा** | |
| | **'प्रातः कालः' इतिविषयम् अधिकृत्य मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि लिखत।** **मञ्जूषा** उपवनम्, शीतलः, वायुः, खगानाम् कलरवः, सूर्योदयः, वृद्धाः, स्वास्थ्यवर्धकः, जनाः, भ्रमन्ति, क्रीडन्ति, व्यायामः। | 10 |
| | **खण्डः 'ग'** **अनुप्रयुक्त व्याकरणम् – ( 30 अङ्काः )** | |
| 4 | **अधोलिखितेषु वाक्येषु रेखाङ्कितपदेषु सन्धिं विच्छेदं वा कुरुत–** (i) तदैव सा विहस्य अवदत्। (ii) बालकाः नत+उन्नते मार्गे क्रीडन्ति। (iii) मनसः निग्रहं वायोरिव सुदुष्करम् वर्तते। | 5 |

JSUNIL TUTORIAL

| | | | |
|---|---|---|---|
| | | (iv) बालकः विद्यालयं+गच्छति।<br>(v) हे बालाः ! पुस्तिकायाम् एकम् अनुच्छेदम् लिखतु। | |
| 5 | **(I)** | **अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वाप्रदत्तविकल्पेभ्यः चित्वा लिखत।**<br>(i) मेषमध्ये एकः मेषःभोजनं खादति।<br>(अ) मेषाय मध्ये (ब) मषाणां मध्ये<br>(स) मेषाःमध्ये (द) मेषां मध्ये<br>(ii) राज्ञः आदेशम् श्रुत्वा कपयः भयत्रस्ताः जाताः।<br>(अ) राज्ञदेशम् (ब) राज्ञादेशम्<br>(स) राज्ञोदेशम् (द) राजादेशम्<br>(iii) शीतलम् सलिलम् सुखं ददाति।<br>(अ) शीतलासलिलम् (ब) शीतलसलिलः<br>(स) शीतलसलिलम् (द) शीतलंसलिलम्<br>(iv) एकोनविंशतितमा शताब्दी अतीता।<br>(अ) शतस्य अब्दानां समाहारः (ब) शतानां अब्दी<br>(स) शतेषु अब्देषुसमाहारः (द) शतस्य अब्दी<br>(v) सःसप्तानाम् अह्नां समाहारे कार्यं समापयिष्यति।<br>(अ) सप्ताहे (ब) सप्ताहान्ते<br>(स) सप्ताहमध्ये (द) सप्ताहम्<br>(vi) पुरुषःसिंह इव सःरणे विचरति।<br>(अ) सिंहपुरुषः (ब) पुरुषेसिंहः<br>(स) पुरुषसिंह (द) पुरुषः सिंहः | 6 |
| 6 | **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृतिप्रत्ययौ संयोज्य विभज्य वा उत्तरं लिखत।**<br>(i) तेन लेखः लिख् + तव्यत्।<br>(ii) पुरा मवाडराज्ये शक्तिमान् नृपः प्रतापः आसीत्।<br>(iii) धनी जनः दानेन शोभते।<br>(iv) एषः पाठः युष्माभिः पठनीयः।<br>(v) मनुष्यः समाज + ठक् प्राणी अस्ति। | | 5 |
| 7 | **प्रदत्तविकल्पेभ्यः उचितम् अव्ययपदं चित्वा वाक्येषु रिक्तस्थानानि पूरयत ।**<br>(i) अभ्यासेन __________कुशलः भविष्यसि।<br>(ii) __________आर्यभटः नाम गणितज्ञः अभवत्। | | 5 |

JSUNIL TUTORIAL


http://jsuniltutorial.weebly.com/

| | | | |
|---|---|---|---|
| | | (iii) श्रेष्ठः बालकः __________समयं न यापयेत्।<br>(iv) दूरभाषे __________ मा वदेयुः।<br>(v) अहं __________सफलं भविष्यामि।<br>**मञ्जूषा**<br>नूनम्, वृथा, शनैः, उच्चैः, पुरा | |
| | 8 | **(I) अधोलिखिते संवादे रिक्तस्थानानि वाच्यानुसारं उचितपदेन चित्वा पूरयत।**<br>माता – अनुजे! अनुजे! शीघ्रम् आगच्छ।<br>अनुजा – मातः! मया __(i)__ ।<br>माता – त्वं किमर्थं विलम्बं __(ii)__ ।<br>अनुजा – अहं संगणके कार्यं करोमि।<br>माता – किं त्वं न पठसि?<br>अनुजा – __(iii)__ संगणके पठ्यते एव।<br>पुत्रः – पितः! पश्यतु, जनैः नद्याः जलं दूषितं __(iv)__ । (कृ)<br>पिता – आम्। परं किं कुर्याम्?<br>पुत्रः – __(v)__ सर्वैः कथितव्यम् यत् एवं न उचितम्। (अस्मद्) | 5 |
| | 9 | **समयलेखनम्** –<br>**एतेषु वाक्येषु अङ्कानां स्थाने संस्कृतसंख्यापदानि लिखत** –<br>(i) सुकुमारः प्रातः उत्थाय __5.30__ वादने संस्कृतं पठति।<br>(ii) सः __6.00__ वादने हिन्दीविषयं पठति।<br>(iii) सः __6.15__ वादने गणितविषयं पठति।<br>(iv) तत्पश्चात् __6.45__ वादने विज्ञानम् अपि पठित्वा विद्यालयं गच्छति। | 4 |
| | | **खण्ड : 'घ'**<br>**पठित–अवबोधनम् – 35 अङ्काः** | |
| | 10 | **अधोलिखितं गद्यांशं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि निर्देशानुसारं लिखत।** | 5 |

JSUNIL TUTORIAL



http://jsuniltutorial.weebly.com/

राजा वैद्योक्तविधिना नीलोत्पलम् इव एकं चक्षुः शनैः अक्षतम् उत्पाट्य प्रीत्या याचकाय समर्पितवान्। सोऽपि तन्नेत्रं यथास्थानम् अस्थापयत्। ततो महीपालः द्वितीयं नेत्रमपि शनैः उत्पाट्य निष्कास्य च तस्मै ददौ। अथ विस्मितः शक्रः अचिन्तयत् –

अहो धृतिरहो सत्त्वमहो सत्त्वहितैषिता।

नायं चिरं परिक्लेशमनुभवितुमर्हति। अतः प्रयतिष्ये चक्षुषोऽस्य पुनः प्रत्यारोपणाय इति।

I. **एकपदेन उत्तरत।**

(i) राजा किं समर्पितवान्?

(ii) राजा स्वनेत्रं कस्मै समर्पितवान्?

II. **पूणवाक्येन उत्तरत।**

विस्मितः शक्रः किम् अचिन्तयत्?

III. **निर्देशानुसारम् उत्तरत –**

(i) 'शीघ्रम्' इति पदस्य कः विलोमः अत्र प्रयुक्तः?

(अ) अक्षतम् (ब) शनैः

(स) चक्षुः (द) अथ

(ii) 'समर्पितवान्' इति क्रियापदस्य कर्तृपदं किम्?

(अ) राजा (ब) याचकः

(स) शकः (द) अक्षतम्

11 असंशयं महाबाहो मनो दुर्निग्रहं चलम्।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते।। 5

**I. एकपदेन उत्तरत।**

(i) वैराग्येण किं गृह्यते?

(ii) किं चञ्चलं भवति?

**II. पूर्णवाक्येन उत्तरत।**

मनः कथं गृह्यते?

**III. अधोदत्तप्रश्नयोः उचितं उत्तरं चित्वा लिखत –**

(i) कुन्तीपुत्र–इत्यर्थे अत्र किं पदं प्रयुक्तम्?

(अ) महाबाहो (ब) कौन्तेय

(स) असंशयं (द) तु

(ii) 'संशयम्' सह' इति पदस्य कः विलोमः अत्र प्रयुक्तः?

(अ) असंशयम् (ब) मनः

(स) चलम् (द) दुर्निग्रहम्

JSUNIL TUTORIAL


http://jsuniltutorial.weebly.com/

| | | | |
|---|---|---|---|
| 12 | **अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।**<br>अर्जुन: – केन प्रयुक्त:पूरुष: पापं चरति?<br>कृष्ण: – कामेन।<br>अर्जुन: – काम: कस्मात् उद्भवति?<br>कृष्ण: – रजोगुणात् काम: उद्भवति।<br>अर्जुन: – काम: कीदृशोऽस्ति?<br>कृष्ण: – काम: महाशन: महापाप्मा च अस्ति।<br>अर्जुन: – किं क्रोधोऽपि महाशन: महापाप्मा च।<br>कृष्ण: – उचितं पृष्टं भवता। क्रोधोऽपि महाशन: महापाप्मा।<br>अर्जुन: – एवम्।<br>कृष्ण: – पार्थ ! एताभ्याम् एव वैरस्य उत्पत्ति: भवति।<br>**I. एकपदेन उत्तरत।**<br>(i) काम: कस्मात् उद्भवति?<br>(ii) केन प्रयुक्त: पूरुष: पापं चरति?<br>**II. पूर्णवाक्येन उत्तरत।**<br>कामस्य स्वरूपं कीदृशम् वर्णितम् अत्र?<br>**III. निर्देशानुसारं शुद्धम् उत्तरं विकल्पेभ्य: चित्वा लिखत।**<br>(i) 'चरति' इति क्रियापदस्य कर्तृपदं किम्?<br>(अ) काम: (ब) क्रोध:<br>(स) पूरुष: (द) पापम्<br>(ii) 'इच्छा' इति पदस्य पर्यायपदं किम्?<br>(अ) महाशन: (ब) महापाप्मा<br>(स) क्रोध: (द) काम: | 5 |
| 13 | **मञ्जूषात: उचितपदानि चित्वा अधोलिखितश्लोकयो: भावार्थम् पूरयत।**<br>**I.** काम एष क्रोध एष रजोगुणसमुद्भव:।<br>महाशनो महापाप्मा विद्ध्येनमिह वैरिणम्।।<br>**भावार्थ:** – कृष्ण: अर्जुनं वदति–हे अर्जुन! इन्द्रियजनित: ___(i)___ एव मनुष्यस्य ___(ii)___ नाशं करोति। एष: काम: एव पापयुक्त: ___(iii)___। एनम् अस्मिन् लोके स्वकीयं ___(iv)___ जानीहि।<br>**II.** अपूर्व: कोऽपि कोशोऽयं विद्यते तव भारति।<br>व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात्।। | 4 |

JSUNIL TUTORIAL


http://jsuniltutorial.weebly.com/

| | | | |
|---|---|---|---|
| | **भावार्थः** – हे सरस्वति! एषः तव निधिः कोऽपि __(v)__ विद्यते। __(vi)__ वर्धते __(vii)__ च क्षीणः __(viii)__ ।<br><br>**मञ्जूषा**<br>शत्रुम्, भवति, कामः, सञ्चयात्, सर्वथा, अपूर्वः, अस्ति, व्ययतः | |
| 14 | **अधोलिखितश्लोकस्य अन्वयम् मञ्जूषातः पदानि चित्वा पूरयत।**<br>नास्ति विद्यासमं चक्षुः नास्ति सत्यसमं तपः।<br>नास्ति रागसमं दुःखं नास्ति त्यागसमं सुखम्।।<br>**अन्वयः** – विद्यासमं __(i)__ न अस्ति, सत्यसमं तपः न __(ii)__ । रागसमं __(iii)__ न अस्ति, त्यागसमं __(iv)__ न अस्ति।<br><br>**मञ्जूषा**<br>सुखम्, अस्ति, चक्षुः, दुःखम् | 4 |
| 15 | **वाक्येषु रेखांकितपदानां स्थाने प्रश्नवाचकपदं प्रयुज्य प्रश्ननिर्माणं कुरुत** –<br>(i) तदा <u>राजवैद्यः</u> प्रोवाच।<br>(ii) सूर्योदये <u>तमः</u> नश्यति।<br>(iii) <u>भयत्रस्ताः</u> कपयः अचिन्तयन्।<br>(iv) <u>यथोचितं</u> क्रियते। | 4 |
| 16 | **अधोलिखितवाक्यानि घटनाक्रमेण पुनः लेखनीयानि।**<br>(i) मेषेषु एकः महानसं प्रविश्य भोजनं खादति स्म।<br>(ii) सूपकारमेषमध्ये कलहं दृष्ट्वा यूथपतिः कपीन् अवदत्।<br>(iii) तस्य पुत्राः वानरैः सह क्रीडन्ति स्म।<br>(iv) वयं शीघ्रमेव राजभवनं त्यक्त्वा वनं गच्छामः।<br>(v) नगरे चन्द्रः नाम भूपतिः वसति स्म।<br>(vi) वानराः यूथपतेः वचनं न अमन्यन्त।<br>(vii) सूपकाराः तं मेषं काष्ठादिभिः ताडयन्ति स्म।<br>(viii) राजगृहे मेषयूथः अपि आसीत्। | 4 |
| 17 | **रेखाङ्कितपदानां प्रसंगानुसारम् उचितम् अर्थं चित्वा लिखत** –<br>(i) आचार्यात्पादमादत्ते <u>पादं</u> शिष्यः स्वमेधया।<br>(अ) चतुर्थांशम् (ब) चरणम्<br>(स) पादपः (द) श्लोकस्य पंक्तिः | 4 |

JSUNIL TUTORIAL

JSUNIL TUTORIAL

(ii) माधुर्यम् अक्षरव्यक्तिः पदच्छेदस्तु सुस्वर।

(अ) कण्ठस्य मधुरता (ब) शर्करायुक्तम्

(स) मधुरतायाः अभावः (द) मधुरता

(iii) ऊहापोहार्थविज्ञानं तत्वज्ञानं च धीगुणाः।

(अ) बुद्धेः (ब) सरस्वती

(स) विद्या (द) छात्रः

(iv) वाङ्मयम् तपः उच्यते।

(अ) साहित्यम् (ब) वाक्

(स) संस्कृतम् (द) वाचिकम्

JSUNIL TUTORIAL

 http://jsuniltutorial.weebly.com/